# .. mAndhAtRishaileshvarI stotra ..

## ॥ मान्धातृशैलेश्वरीस्तोत्र ॥

### Document Information

Text title : mAndhAtRishaileshvarI aShTakam

File name : mAndhAtRishaileshvarI8.itx

Category : aShTaka

Location : doc_devii

Author : Ottuur Unni Namboodripaadu

Language : Sanskrit

Subject : philosophy/hinduism/religion

Transliterated by : Usha Iyer iyerku at gmail.com

Proofread by : Usha Iyer iyerku at gmail.com

Latest update : June 19, 2011

Send corrections to : Sanskrit@cheerful.com

Site access : http://sanskritdocuments.org

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted for promotion of any website or individuals or for commercial purpose without permission.

Please help to maintain respect for volunteer spirit.

August 2, 2016

*sanskritdocuments.org*

# ॥ मान्धातृशैलेश्वरीस्तोत्र ॥

श्री गणेशाय नमः ॥

वन्दे नीलकलेवरां त्रिनयनांदंष्ट्राकरालाननां,
घण्टा मर्मशरावमुण्ड भुजगैः खट्वाङ्गशूलासिभिः ।
आरूढाष्टभुजां किरीटरशनाघोषादिभिर्भूषणै -
राशीर्षाङ्घ्रिविटङ्कितां भगवतीम् मान्धातृशैलेश्वरीम् ॥ १॥

मञ्जीरैर्मुखरीकृताङ्घ्रियुगलां सन्ध्याभ्रशोणांबरां
चञ्चद्धोरकृपाणपाणिकमला मुज्जृम्भितभ्रूलतां ।
सारंभप्रसरत्स्फुलिङ्ग नयनामुच्चाट्टहासस्वनैर्
निर्धूताखिलसद्भयामनुभजे मान्धातृशैलेश्वरीम् ॥ २॥

वन्दे वक्षसिवृक्णदानवशिरो मालामयं कञ्चुकं,
कर्णे कुञ्जरकुण्डलं कटितटे भोगीन्द्रकाञ्चीगुणम् ।
हस्तेदारिकरक्तपङ्किलमुखं धृत्वा खलानां भयं,
शिष्टानामभयं च या दिशति तां मान्धातृशैलेश्वरीम् ॥ ३॥

स्मेरापाङ्गविलोकविभ्रमरसैः शूलादिभिश्चायुधैः -
साधूनां च दुरात्मनां च हृदयग्रन्थिंसकौतूहलम् ।
कृन्तन्तीम् भुवनत्रयैकजननीं वात्सल्यवारान्निधिं
वन्देऽस्मत् कुलदेवतां शरणदां मान्धातृशैलेश्वरीम् ॥ ४॥

शुद्धान्तःकरणस्य शम्भुचरणां भोजेप्रपन्नात्मनो,
निष्कामस्य तपोधनस्य, जगतां श्रेयोविधानार्थिनः ।
मान्धातुर्हितकारिणीं गिरिसुता पुत्रीं कृपावर्षिणीं
वन्दे भक्तपरायणां भगवतीम् मान्धातृशैलेश्वरीम् ॥ ५॥

कैलासादवतीर्यभार्गववरक्षोणीगते पावन -
क्षेत्रेसन्निहितांसदा हरिहरब्रह्म्यादिभिः पूजितां ।
भक्तानुग्रहकातरां, स्थिरचरप्राणिव्रजस्याम्बिकां
मान्धातुर्वंशवर्तिनीमनुभजे मान्धातृशैलेश्वरीम् ॥ ६॥

संख्यातीतभटैर्वृतेनरिपुणा सामूतिरिक्षोणिपे
नाक्रान्तस्यनिजाङ्घ्रिमात्रशरणस्यात्यल्पसेनाभृतः
प्राणंवल्लुवभूमिपस्यतिलशस्तेषांशिरच्छेदनै -
रक्षन्तीमनुकम्पयानुकलये मान्धातृशैलेश्वरीम् ॥ ७॥

तुर्यस्थानविहारिणीमशरणानुद्धर्तुमाकांक्षिणी -

मार्षोर्व्यामवतारिणीं भृगुवरक्षेत्रेस्थिरावासिनीम् ।
भक्तानामभयङ्करीमविरलोत्सर्पत् कृपानिर्झरीं
वाताधीश सहोदरीं परिभजे मान्धातृशैलेश्वरीम् ॥ ८॥

Composed by OttUr Unni NamboodripAdu

Encoded and proofread by Usha K.Iyer iyerku at gmail.com

.. mAndhAtRishaileshvarI stotra ..
was typeset on August 2, 2016

Please send corrections to *sanskrit@cheerful.com*